# tattvAryAstavaH Hymn on Lord Nataraja at Chidambaram

# તત્ત્વાર્યાસ્તવઃ

## Document Information

Text title : tattvAryAstavaH Hymn on Lord Nataraja at Chidambaram

File name : tattvAryA.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : Hymn on Lord Nataraja at Chidambaram

Latest update : December 29, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# તત્ત્વાર્યાસ્તવઃ

શિવકામસુન્દરીશં શિવગઙ્ગાતીરકલ્પિતનિવેશમ્ ।
શિવમાશ્રયે દ્યુકેશં શિવમિચ્છન્મા વપુષ્યભિનિવેશમ્ ॥ ૧॥

ગીર્વાણચક્રવર્તી ગીશ્ચેતોમાર્ગદૂરતોવર્તી ।
ભક્તાશયાનુવર્તી ભવતુ નટેશોઽખિલામયનિવર્તી ॥ ૨॥

વૈયાઘ્રપાદભાગ્યં વૈયાઘ્રં ચર્મ કંચન વસાનમ્ ।
વૈયાકરણફણીડ્યં વૈયાસિક્યા ગિરા સ્તુતં પ્રણુમઃ ॥ ૩॥

હાટકસભાનિવાસઃ શાટકતાપન્નસકલહરિદન્તઃ ।
ઘોટકનિગમો માયાનાટકસાક્ષી જગત્પતિર્જયતિ ॥ ૪॥

શૈલૂષરાજમાદ્યં માલૂરપ્રસવમાલિકાભરણમ્ ।
પીલૂપમોઽન્ધુજીર્યચ્છાલૂરાભઃ કથં વિજાનીયામ્ ॥ ૫॥

કનકસભૈકનિકેતં કઠિનપુરાણોક્તિસારસંકેતમ્ ।
નારાધયન્તિ કે તં નારાયણ્યા યુતં સ્વતોકેતમ્ ॥ ૬॥

તિલ્લવને ક્ષુલ્લવને પલ્લવસંભિન્નફુલ્લપુષ્પઘને ।
ચિલ્લહરીમુલ્લલયન્ વલ્લભયા ભિલ્લતલ્લજો નટતિ ॥ ૭॥

વૈરાજહૃત્સરોજે વૈરાજાદ્યૈઃ સ સામભિઃ સ્તવ્યઃ ।
વૈરાગ્યાદિગુણાઢ્યૈઃ વૈરાદ્યુત્સૃજ્ય દૃશ્યતે નૃત્યન્ ॥ ૮॥

ઢક્કાનિનદૈઃ સૂત્રાણ્યઙ્ગદનાદૈરહો મહદ્ભાષ્યમ્ ।
વ્યાકરણસ્ય વિવૃણ્વન્ નૃત્યતિ ભૃત્યાન્ કૃતાર્થયન્ મર્ત્યાન્ ॥ ૯॥

નટનાયક નટનાય ક ઇહ સુકૃતી નો તવ સ્પૃહયેત્ ।
મન્ડજુલતામઞ્જુલતામહિતે વસ્તું ચ તિલ્લવને ॥ ૧૦॥

અતિદુરિતોત્તારકૃતે ચિરધૃતહર્ષઃ સભાપતિઃ સદ્યઃ ।
અગણેયાઘઘનં મામાસાદ્યાનન્દમેદુરો નટતિ ॥ ૧૧॥

મત્પાદલગ્નજનતામુદ્ધર્તાસ્મીતિ ચિત્સભાનાથઃ ।
તાણ્ડવમિષોદ્ધૃતૈકસવાઙ્ઘ્રિઃ સર્વાન્ વિબોધયતિ ॥ ૧૨॥

આપન્નલોકપાલિનિ કપાલિનિ સ્ત્રીકૃતાઙ્ગપાલિનિ મે ।
શમિતવિધિશ્રીશરણે શરણા ધીરસ્તુ ચિત્સભાશરણે ॥ ૧૩॥

ભિક્ષુર્મહેશ્વરોઽપિ શ્રુત્યા પ્રોક્તઃ શિવોઽપ્યુગ્રઃ ।
અપિ ભવહારી ચ ભવો નટોઽપિ ચિત્રં સભાનાથઃ ॥ ૧૪॥

નૃત્યન્નટેશમૌલિત્વઙ્ગદ્ગઙ્ગાતરઙ્ગશીકરિણઃ ।
ભૂષાહિપીતશિષ્ટાઃ પુનન્તુ માં તિલ્લવનવાતાઃ ॥ ૧૫॥

કનકસભાસમ્રાજો નટનારમ્ભે ઝલંઝલંઝલિતિ ।
મઞ્જીરમઞ્જુનિનદા ધ્વનિયુઃ શ્રોત્રે કદા નુ મમ ॥ ૧૬॥

પર્વતરાજતનૂજાકુચતટસંક્રાન્તકુઙ્કુમોન્મિશ્રાઃ ।
નટનાર્ભટીવિધૂતા ભૂતિકણાસ્તે સ્પૃશેયુરપિ મેઽઙ્ગમ્ ॥ ૧૭॥

નટનોચ્ચલત્કપાલામર્દિતચન્દ્રક્ષરત્સુધામિલિતાઃ ।
આદિનટમૌલિતટિનીપૃષતો ગોત્રેઽત્ર મે સ્ખલેયુઃ કિમ્ ॥ ૧૮॥

પશ્યાનિ સભાધીશં કદા નુ તં મૂર્ધનિ સભાધીશમ્ ।
યઃ ક્ષયરસિકં કાલં જિતવાન્ ધત્તે ચ શિરસિ કઙ્કાલમ્ ॥ ૧૯॥

તનુજાયાતનુજાયાસક્તાનાં દુર્લભં સભાનાથમ્ ।
નગતનયા નગતનયા વશયતિ દત્ત્વા શરીરાર્ધમ્ ॥ ૨૦॥

આનન્દતાણ્ડવં યસ્તવેશ પશ્યેન્ન ચાપિ નૃગણે યઃ ।
સ ચ સ ચ ન ચન્દ્રમૌલે વિદ્વદ્ભિર્જન્મવત્સુ વિગણેયઃ ॥ ૨૧॥

કામપરવશં કૃત્વા કામપરવશં ત્વકૃત્વા મામ્ ।
કનકસભાં ગમયસિ રે કનકસભાં હા ન યાપયસિ ॥ ૨૨॥

નટનં વિહાય શંભોર્ઘટનં પીનસ્તનીભિરાશાસ્સે ।
અટનં ભવે દુરન્તે વિટ નન્દસિ ન સ્વભૂમસુખમ્ ॥ ૨૩॥

કલિતભવલઙ્ઘનાનાં કિં કરૈવ ચિત્સુખઘનાનામ્ ।
સુમુદાં સાપઘનાનાં શિવકામેશ્યાઃ કૃપામૃતઘનાનામ્ ॥ ૨૪॥

નિનિલીયે માયાયાં ન વિલિયે વા શુચા પરં લીયે ।
આનન્દસીમનિ લસત્તિલ્લવનીધામનિ સ્વભૂમનિ તુ ॥ ૨૫॥

અધિહેમસભં પ્રસભં બિસભઙ્ગવદાન્યધન્યરુચમ્ ।
શ્રુતગલગરલં સરલં નિરતં ભક્તાવને ભજે દેવમ્ ॥ ૨૬॥

સભયા ચિત્સભયાસીન્માયા માયાપ્રબોધશીતરુચેઃ ।
સુહિતા ધીઃ સુહિતા મે સોમા સોમાર્ધધારિણી મૂર્તિઃ ॥ ૨૭॥

પત્યા હેમસભાયાઃ સત્યાનન્દૈકચિદ્વપુષા ।
કત્યાર્તા ન ત્રાતા નૃત્યાયત્તેન માદૃશા મર્ત્યાઃ ॥ ૨૮॥

ભજતાં મુમુક્ષયા ત્વાં નટેશ લભયાસ્ત્રયઃ પુમર્થાશ્ચ ।
ફલલિપ્સયામ્રભાજાં છાયાસૌરભ્યમાધવ્ય ઇવ ॥ ૨૯॥

કઞ્ચુકપઞ્ચકનદ્ધં નટયસિ માં કિં નટેશ નાટયસિ ।
નટસિ નિરાવૃતિસુખિતો જહિ માયાં ત્વાદૃશોઽહમપિ તત્ સ્યામ્ ॥ ૩૦॥

આસ્તાં નટેશ તદ્યન્નટતિ ભવાનમ્બરે નિરાલમ્બે ।
ત્વન્નટનેઽપિ હિ નટનં વેદપુરાનાગમાઃ સમાદધતિ ॥ ૩૧॥

વેધસિ સર્વાધીશેઽમેધસિ વા માદૃશે સરૂપકૃતા ।
રોધસિ શિવગઙ્ગાયા બોધસિરા કાચિદુલ્લસતિ ॥ ૩૨॥

હટ્ટાયિતં વિમુક્તેઃ કુટ્ટાકં તં ભજામિ માયાયાઃ ।
ભટ્ટારકં સભાયાઃ કિટ્ટાત્મન્યઙ્ગકે ત્યજન્મમતામ્ ॥ ૩૩॥

શ્રીમચ્ચિદમ્બરેશાદન્યત્રાનન્દતાણ્ડવાસક્તાત્ ।
બ્રાહ્મં લક્ષણમાસ્તે કુત્રચિદાનન્દરૂપતા દેવે ॥ ૩૪॥

ક્ષુલ્લકકામકૃતેઽપિ ત્વત્સેવા સ્યાદ્વિમુક્તિમપિ દાત્રી ।
પીતામૃતોઽપ્યુદન્યાશાન્ત્યૈ સ્યાચ્ચિત્સભાધિપામર્ત્યઃ ॥ ૩૫॥

સત્યં સત્યં ગત્યન્તરમુત્સૃજ્ય તે પદાપાત્યમ્ ।
અત્યન્તાર્તં ભૃત્યં ન ત્યજ નિત્યં નટેશ માં પાહિ ॥ ૩૬॥

ષટ્ત્રિંશતા તત્ત્વમયીભિરાભિઃ સોપાનભૂતાભિરુમાસહાયમ્ ।
આર્યાભિરાદ્યં પરતત્ત્વભૂતં ચિદમ્બરાનન્દનટં ભજધ્વમ્ ॥ ૩૭॥

॥ ઇતિ શ્રીતત્ત્વાર્યાસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*tattvAryAstavaH Hymn on Lord Nataraja at Chidambaram*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*